श्री रुद्र-चण्डी

बन्धूक-कुसुमाभासां, पञ्च-मुण्डाधि-वासिनीम्।
स्फुरच्चन्द्र-कला-रत्न-मुकुटां मुण्ड-मालिनीम्।
त्रि-नेत्रां रक्त-वसनां, पीनोन्नत-घट-स्तनीम्।
पुस्तकं चाक्ष - मालां च, वरं चाभयकं क्रमात्।
दधतीं संस्मरे नित्यमुत्तराम्नाय-मानिताम्।।